*Govidarajan. S., (September 2018).,Int.J.Res.Ins.,Vol 5 (Issue 2).,pp 17-20*

International Journal of Research Instinct
(Peer-reviewed Journal)

ISSN ONLINE 2348-2095
Research Article

# श्रीभगवद्ध्यानसोपनम्

**S.Govindarajan**
*Department of Sanskrit, Rajah's College, Thiruvaiyaru*

## उपोद्घातः

अस्मिन् संसारलोके विद्यमानानां जीवानां उद्धारणार्थं धर्मरक्षणार्थं च "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत" इत्युक्तरीत्या तदा तदा भूमौ भगवान् अवततार । एवञ्च स एव भगवान् साधूनां सन्मार्गदर्शनार्थं स्वांशभूत दिव्यसूरीणां (ஆழ்வார்கள்) अवतारमपि कारितवान् । तत्र दिव्यसूरयः शठकोपप्रभृतयः द्वादश तेषु अन्यतमः திருப்பாணாழ்வார் इति नाम्ना प्रसिद्धः भक्तिसारः । सः भक्तिसारः भगवन्तं श्रीरङ्गनाथं स्तौति (அமலனாதிபிரான்) इति प्रबन्धेन । अस्मिन् प्रबन्धे आदौ 'अमलन्' इति अकारपूर्वकं आरभ्य आद्यपद्यत्रये क्रमेण अकार उकार मकार इति प्रणवस्वरूपं दर्शयति । एवञ्च दशपद्यत्मकेऽस्मिन् प्रबन्धे भगवतः आपादचूडं अवयवं अनुभवति । अस्य प्रबन्धस्य आदौ 'तनियन्' इति पद्यमेकं वर्तते । अस्य रचयिता பெரிய நம்பிகள் (पेरियनम्बिकळ्)

आपादचूडं अनुभूयहरिंशयानम् मध्ये कवेरदुहितुर्मुदिदान्तरात्मा ।
अद्रष्टृतां नयनयोर्विषयान्तराणाम् यो निश्चिकाय मनवै मुनिवाहन्तम् ॥

अस्य द्राविडभाषया 'तनियन्' திருமலை நம்பிகள் (तिरुमलै नम्बिगळ्)

**रचयामास**

காட்டவே கண்ட பாதகமலம் நல்லாடையுந்தி
தேட்டருமுதரபந்தம் திருமார்வுகண்டம் செவ்வாய்
வாட்டமில் கண்கள் மேனி முனியேறித்தனிபகுந்து
பாட்டினால் கண்டுவாழும் பாணர்தாள் பரவினோமே.

एतादृश, भगवदनुभवः योगशास्त्रोक्त अष्टाङ्गयोगविधिं स्मारयति । यम , नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यानं, समाधि इत्यादीनि अष्टाङ्गानि । अस्य प्रबन्धस्य व्याख्यानं मणिप्रवालरूपेण

मुनिवाहनभोगः इति नाम्ना श्रीवेदान्तदेशिकः रचयामास । स एव आचार्यः द्वादशपद्यात्मकस्तोत्रप्रबन्धमेकं 'भगवद्ध्यानसोपानं' इति नाम्ना रचितवान् ।

**भगवान् ज्योतिर्मयः**

अन्तः शरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयो वीतरागाः हृद्यन्तज्योतिः भारूपः सर्वगन्धः सर्वरसः एष म आत्मान्तर्हृदये , इदं वाव तद्यदिदस्मिन्नन्तः पुरुषे ज्योतिः इत्यादिश्रुतयः 'अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते' वाङ्मनसातीतं चक्षुराद्यगोचरं सर्वान्तरं योगिहृद्ध्यानगम्यं प्रत्यग्ज्योतिः भगवत्करुणापरिणामविशेषात् निखिलभूत -नियाम्यतया रङ्गमध्ये बहिर्दृश्यते । श्रीरङ्गे परस्य ब्रह्मणः शेषित्वं स्फुटमीक्ष्यते ।

**अष्टावयवाः**

अष्टभिः श्लोकैर्दिव्यमङ्गलविग्रहानुसंधानप्रकारः ।

1) जङ्घासौन्दर्यवर्णनम् ।
2) ऊरुद्वयानुभवः ।
3) नाभीकमलवर्णनम् ।
4) वक्षस्थलानुभवः ।
5) बाहुद्वयानुभवप्रकारः ।
6) मुखसौन्दर्यानुभवः ।
7) किरीटवर्णनम् ।
8) आपादचूडवर्णनम् ।

**1. जङ्घासौन्दर्यवर्णनम्**

जङ्घासौन्दर्यानुभवप्रकारप्रदर्शनपूर्वकं तज्जन्य फलमपि संसारनिवृत्ति प्रयोजकं इति प्रतीयते ।

**2. ऊरुद्वयानुभवः**

कामारामा मन्मथोद्यानं तस्मिन् स्थिरे वाताद्यनुपहते , ये कदलिके रम्भावृक्षस्तम्भाविति सम्भावनीयं ऊहनीयमिति ऊरुयुग्मविशेषणं, स्निधत्व वर्तुलत्व शीतलत्वादि विषये तत्सदृशमितिभावः ॥

**3. नाभीकमलवर्णनम्**

सुजाता शोभनदर्शना गम्भीरत्वात् अगाधत्वात् । अनेन नाभेर्वर्तुलत्व शीतलत्व तेजः प्रचुरत्वानि सूचितानि

रङ्गनाथस्य नाभिः, स्पष्टः असाविति विशेषणेन चाक्षुष प्रत्यक्षविषयत्वम् । मे दिव्यमङ्गलविग्रह अनुभवसापेक्षस्य मम मानसं मनः । आसौ रङ्गनाथस्य नाभिः मे मानसं प्रतिकलं अनुक्षणं सम्प्रीणाति सम्यक् प्रीणयति ।

" உந்திமேலதன்றோ அடியேன் உள்ளத்தின் உயிரே "

सर्गप्रलययोरुपकर्त्रीनाभिरस्माकम् उपस्नेहयतीतिभावः ।

**4. वक्षस्थलानुभवः**

श्रीवत्सेन श्रीवत्साख्यलाञ्चनेन திருவாரமார்பு प्रथितविभवं ज्ञापितन्यासधन्य लक्ष्मीचरणारविन्द न्यासाधीनं श्रुतिः ह्नीश्चते लक्ष्मीश्चपत्न्यवित्युक्तरीत्या लक्ष्मीज्ञापितमहिमकमिति ।

**5. बाहुद्वयानुभवप्रकारः**

" आजानुबाहू अरविन्ददलायदाक्षम् इत्युक्तरीत्या अत्र बाहुद्वयानुभव प्रकारः ।

**6. मुखसौन्दर्यानुभवः**

" चन्द्रकान्ताननं रामं अतीवप्रियदर्शनं " என் சிந்தைக் கவர்ந்ததுவே साभिप्रायस्मित विकसितं आश्रित रक्षणोपयोगिसरसाभिप्राय गर्भमन्दहासेन विकसितं आश्रित रक्षणोपयोगिसरसाभिप्राय गर्भमन्दहासेन विकसितं उल्लसितम् । ईषत् विकसितैर्गण्डैः कटाक्षैस्सौष्ठवान्वितैः । अलक्षित द्विजन्धीरमुत्त मानां स्मितम्भवेदित्युक्त लक्षणस्मितयुक्तं इति भावः । अत्र भगवतः साक्षात्काररूपानुभवविच्छेदेपि सर्वदानुभवतुल्य स्मृत्यनुवृत्तिः नियता इति ।

**7. किरीटवर्णनम्**

अन्तस्स्थिरपरिमलैः दिव्यगन्धविशेषैः नायिका करस्पर्शजनितोत्कर्षैः माल्यैः शिरोलङ्कारमालाभिः कान्तिभिः चित्रवर्णे रङ्गभर्तुः किरीटे अवस्थानं प्राप्ताः मम मनसः प्रीतिरूपापन्नध्यानरूपवृत्तयः विषयलाभेन सन्तुष्टा भवन्ति ।

**8. आपादचूडवर्णनम्**

अत्र पूर्वानुभूतावयवानेव समूहालम्बनदृष्ट्या दिव्यमङ्गलविग्रहध्यानं परोषामपि सुलभतया भवतु इति ज्ञापनार्थं च वर्णयति । पादाम्भोजस्पर्शनं , रङ्गनाथस्यजङ्घासौन्दर्यं, उरुद्वयं, नाभीकमलं, वक्षस्थलं, बाहुद्वयं, विकसितमुखं, किरीटावर्णनं इति पादादिकेशान्तं वर्णितं भवति ।

**उपसंहारः**

अस्मिन् भगवद्ध्यानसोपानप्रबन्धे आदौ अन्तर्हृदये विद्यमानं ज्योतिर्मयरूपं भगवन्तं ध्यात्वा स एव बहिर्दृश्यमानं भुजगशयनं रङ्गेशं इति वर्णितम् । अनन्तरं तस्य भगवतः पादादिकेशान्तं प्रत्यवयवसौन्दर्यं वर्णयित्वा समुदायशोभां च वर्णितम् । ततः शयनमूर्त्तेः किञ्चित् अग्रे रङ्गमध्ये विराजमानं उत्सवमूर्तिं च वर्णयति । अन्तिमेन पद्येन यमनियमादि - अष्टाङ्गयोगेन प्राप्यमानं भगवन्तं भगवद्ध्यानसोपानस्तुत्या अनायासेन तदनुग्रहेण प्राप्तुं शक्यते इति सफलं दर्शयति ग्रन्थकर्तुः इति शम् ।

**उपयुक्तग्रन्थाः**


[1] उपनिषद्ग्रन्थाः - छान्दोग्योपनिषत् , चौखम्भा संस्कृतप्रतिष्ठान्, नवदिहली , 2011

[2] भगवद्गीता - भगवद्गीता निर्णयसागर् प्रेस्, मुम्बई ,1934

[3] अष्टाङ्गयोगग्रन्थः - अष्टाङ्गयोगग्रन्थः , रामकृष्णा मट्, चैन्नै - 4.

[4] அமலனாதிபிரான் பிரபந்தம் - மைலாப்பூர், சென்னை

[5] திருமலை நம்பிகள் செய்த தனியன்.